वाचाथ देहि विद्यामिमां मम। मत्तोऽपि चाश्वहृदयं गृहाण पुरुषर्षभ!। ऋतुपर्णस्ततोराजा बाहुकं कार्य्यगौरवात्। हयज्ञानस्य लोभाच्च तं तथेत्यब्रवीद्वचः। यथोक्तं त्वं गृहाणेदमक्षाणां हृदयं परम्। निक्षेपोमेऽश्वहृदयं त्वयि तिष्ठतु बाहुक”!। अश्वं विन्दते विद-क्विप्। २अश्वलब्धरि त्रि० “परिणोद्ध अश्वमश्वविदो गोमदि”ऋ० ८,६१,२। “अश्वविदे अश्वस्य लब्धरि” भा०।

**अश्ववैद्य** पु० ६त०। घोटकचिकित्सके तच्चिकित्साप्रकारः। जयदत्तकृतेऽश्वशास्त्रेऽवसेयः।

**अश्वशङ्कु** पु० ६त०। १अश्वबन्धनार्थे कीले। अश्वस्य शङ्कुरिव। २दनुपुत्रभेदे “चत्वारिंशद्दनोः पुत्राः ख्याताः सर्वत्र भारत”! इत्युपक्रम्य “अयःशिरा अश्वशिरा अश्वशङ्कुश्च वीर्य्यवान्” भा०आ०प० ६०अध्या०।

**अश्वशाला** स्त्री ६त०। हयस्थाने मन्दुरायां वाजिशालायाम् तत्करणविधिश्चाश्वशास्त्रे। यथा “प्रागुदक्प्रवणे देशे वालुकाकाष्ठवर्जिते। चिताचैत्यविहीने च शालां कुर्वीत पण्डितः। सुगुप्ता सा च कर्त्तव्या दुष्टकीटाद्यसंयुता। शिशिरे स्थापयेद्देवं रेवन्तं पूजयेत्सदा। कार्य्या त्रिहस्तविस्तीर्णा तालाख्या पिण्डिका शुभा। शालाप्रमाणदीर्घा च तस्यां वासं प्रकल्पयेत्। द्वौ हस्तावुच्छ्रये तस्या मानं चैवं प्रकीर्त्तितम्। कर्कन्धूकाष्ठदण्डं च प्रान्तेऽस्याः स्थापयेद्बहिः” वालूकापूरितं कार्य्यं संस्कृतं चत्वरं तथा। लुण्ठनाय च वाहानां भवेच्चङ्क्रमणाय च” “जय०अश्व०शा० “दहति ते गृहं कोषागारमायुधागारमश्वशालां हस्तिशालाञ्च क्रुद्धः” भा०व० प० १८७ अ०।

**अश्वशास्त्र** न० अश्वलक्षणादिज्ञापकं शास्त्रम्। शालिहोत्रकृते हयलक्षणादिज्ञापके १शास्त्रे तन्मूलके जयदत्तकृते २शास्त्रे च।

**अश्वशिरस्** न०६त० १वाजिमस्तके। अश्वस्य शिरइव शिरोऽस्य॥ २दानवभेदे अश्वशङ्कुशब्दे विवृतिः।“अयःशिरा अश्वशिरा अश्वःशङ्कुश्च वीर्य्यवान्। तथागगनमूर्द्धा च वेगवांश्चात्र पञ्चमः। पञ्चैते जज्ञिरे राजन्! वीर्य्यवन्तोमहासुराः। कैकयेषु महात्मानः पार्थिवर्षभसत्तमाः” भा०आ०प० ६६अध्या०।३हयशिरसि विष्णुमूर्त्तिभेदे, तादृङ्मूर्त्तिधारणमुक्तम्” भा०शा०प०३४२अध्या०“तेऽनुशिष्टा भगवता देवाः सर्षिगणास्तथा। नमस्कृत्य भगवते जग्मुर्देशान् यथेप्सितान्। गतेषु त्रिदिवौकस्सु ब्रह्मैकः पर्य्यवस्थितः। दिदृक्षुर्भगवन्तर्मनिरुद्धतनौ स्थितम्। तं देवो दर्शयामास कृत्वा हयशिरोमहत्। साङ्गानावर्त्तयन् वेदान् कमण्डलुत्रिदण्डधृक्। व्यास उवाच। ततोऽश्वशिरसं दृष्ट्वा तं देवममितौजसम्। लोककर्त्ता प्रभुर्ब्रह्मा लोकानां हितकाम्यया। मूर्द्धा प्रणम्य वरदं तस्थौ प्राञ्जलिरग्रतः। स परिष्वज्य देवेन वचनं श्रावितस्तदा। श्रीभगवानुवाच। लोककार्य्यगतीः सर्वास्त्वं चिन्तय यथाविधि। धाता त्वं सर्वभूतानां त्वं प्रभुर्जगतो गुरुः। त्वय्यावेशितभारोऽहं धृतिं प्राप्स्याम्यथाञ्जसा। यदा च सुरकार्य्यन्ते अविषह्यं भविष्यति। प्रादुर्भावं गमिष्यामि तदात्मज्ञानदैशिकम्। एवमुक्त्वा हयशिरास्तत्रैवान्तरधीयत”।“कपर्द्दिने वराहाय एकशृङ्गाय धीमते। विवस्वतेऽश्वशिरसे चतुर्मूर्त्तिधृते सदा” इति च तत्रैव।

**अश्वशृगालिका** स्त्री अश्वशृगालयोर्वैरं द्वन्द्वात् वैरे वुन्। हयशृगालयोर्वैरे शब्दरत्ना०।

**अश्वश्चन्द्र** त्रि० अश्वैश्चन्द्रयति आह्लादयति चदि-णिच् रक् ३त० वेदे पृ० सुट्। हयेनाह्लादिकायां स्त्रियां “गोमघा जरित्रे अश्वश्चन्द्राः” ऋ० ६,३५,४। “अश्वश्चन्द्राः अश्वैराह्लादयन्त्यः” भा०।

**अश्वषड्गव** न० अश्व+षट्के षड्गवच्। हयषट्के।

**अश्वसनि** त्रि० अश्वं सनुते ददाति-सन-इन् ६त०। हयदायके। “यस्तेऽश्वसनिर्भक्षः”। यजु० ८,१२। अनुसवनादि०।

**अश्वसा** त्रि० सन-विट्-ङा ६त०। हयदातरि। “गोषणिं धियमश्वसां वाजसामुत” ऋ० ६,५३,१०।

**अश्वसाद** पु० अश्वं सादयति गमयति सद-गतौ णिच्-अण् उप०स०। सादिनि।

**अश्वसादिन्** पु० अश्वे सीदति सद-णिनि ७त०। सादिनि (घोड़सओयार) “प्रतिप्रहाराक्षममश्वसादी” रघुः।

**अश्वसेन** पु० १जिनपितृभेदे २नृपभेदे यस्य पुत्रः सनत्कुमारः कुरुक्षेत्रस्थे इक्षुमतीनदीसमीपवासिनि तक्षकसुते ३नागभेदे च। “तक्षकश्चाश्वसेनश्च नित्यं सानुचरावुभौ। कुरुक्षेत्रे च वसतां नदीमिक्षुमतीमनु” भा०आ०प०३अध्या०। “अश्वसेनोऽभवत्तत्र तक्षकस्य सुतो बली। स तीव्रमकरोद्यत्नं मोक्षार्थं जातवेदसः”। भा०आ०प० २२६अध्या०

**अश्वसेननृपनन्दन** पु० ७त०। सनत्कुमारे।

**अश्वस्तन** त्रि० श्वोभवः श्वस्+ट्यु-तुट्च श्वस्तनः न०त०। परदिनास्थायिनि वर्त्तमानदिनमात्रभवे। “अश्वस्तनविधानेन हर्त्तव्यं मनुरब्रवीत्” मनुः स्त्रियां ङीप्।